## सयुच्चयेऽन्यतरस्याम्। (३/२८२६)

अनेकक्रियाध्याहारः समुच्चयः। समुच्चीयमानक्रियावचनाद् धातोरन्यतरस्यां लोट् प्रत्ययो भवति, तस्य लोटो हिस्वौ आदेशौ भवतः। तध्वंभाविनस्तु वा भवतः। भ्राष्ट्रमट, मठमट, खदूरमट, स्थाल्यपिधानमट इत्येवायमटति, इमावटतः, इमेऽटन्ति। भ्राष्ट्रमट, मठमट, खदूरमट, स्थाल्यपिधानमटेत्येव त्वमटसि, युवामटथः, यूयमटथ। अथ वा, भ्राष्ट्रमटत, मठमटत, खदूरमटत, स्थाल्यपिधानमटत इत्येव यूयमटथ। भ्राष्ट्रमट, मठमट, खदूरमट, स्थाल्यपिधानमट इत्येवाहमटामि, आवामटावः, वयमटामः। अथ वा, भ्राष्ट्रमटति, मठमटति, खदूरमटति, स्थाल्यपिधानमटति इत्येवायमटति, इमावटतः, इमेऽटन्ति। भ्राष्ट्रमटसि, मठमटसि, खदूरमटसि, स्थाल्यपिधानमटसि, इत्येव त्वमटसि, युवामटथः, यूयमटथ। भ्राष्ट्रमटामि, मठमटामि, खदूरमटामि, स्थाल्यपिधानमटामि इत्येवाहमटामि, आवामटावः, वयमटामः। [1]छन्दोऽधीष्व, व्याकरणमधीष्व, [2]निरुक्तमधीष्व इत्येवायमधीते, इमावधीयाते, इमेऽधीयते। छन्दोऽधीष्व, व्याकरणमधीष्व, निरुक्तमधीष्व, इत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे। अथ वा, छन्दोऽधीध्वं, व्याकरणमधीध्वं, निरुक्तमधीध्वम् इत्येव यूयमधीध्वे। छन्दोऽधीष्व, व्याकरणमधीष्व, निरुक्तमधीष्व इत्येवाहमधीये, आवामधीवहे, वयमधीमहे। अथ वा, छन्दोऽधीते, [3]व्याकरणमधीते, निरुक्तमधीते, इत्येवायमधीते, इमावधीयाते, इमेऽधीयते। छन्दोऽधीषे, व्याकरणमधीषे, निरुक्तमधीषे इत्येव त्वमधीषे, युवामधीयाथे, यूयमधीध्वे। [4]छन्दोऽधीये, व्याकरणमधीये, निरुक्तमधीये इत्येवाहमधीये, आवामधीवहे, वयमधीमहे॥

## यथाविध्यनुप्रयोगः पूर्वस्मिन्। (४/२८२७)

पूर्वस्मिन् लोड्विधाने यथाविध्यनुप्रयोगो भवति। यस्माद् धातोः लोड् विहितः स एव [5]धातुरनुप्रयोक्तव्यः। धातुसम्बन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव, यथाविध्यर्थं तु वचनम्। तथा चैवोदाहृतम् लुनीहि लुनीहीत्येवायं लुनाति इति। छिनत्ति इति नानुप्रयुज्यते। अधीष्वाधीष्वेत्येवायमधीते। पठति इति नानुप्रयुज्यते॥

## समुच्चये सामान्यवचनस्य। (५/२८२८)

द्वितीये लोड्विधाने समुच्चये सामान्यवचनस्य धातोरनुप्रयोगः कर्तव्यः। ओदनं भुङ्क्ष्व, सक्तून् पिब, धानाः खाद इत्येवायमभ्यवहरति। सर्वविशेषानुप्रयोगनिवृत्त्यर्थं वचनम्। लाघवं च [6]लौकिके [7]शब्दव्यवहारे नाद्रियते। भ्राष्ट्रमट, मठमट, खदूरमट, स्थाल्यपिधानमट इत्येवायमटति इत्यत्रापि कारकभेदात् क्रियाभेदे सति सामान्यवचनता सम्भवत्येव॥

## छन्दसि लुङ्लङ्लिटः। (६/३४२३)

धातुसम्बन्धे इत्येव[8]। छन्दसि विषये [9]धातुसम्बन्धे सर्वेषु लुङ्लङ्लिटः प्रत्यया भवन्ति। अन्यतरस्याम् इति वर्तते। तेनान्येऽपि लकारा यथायथं भवन्ति[10]। [11]लुङ – शकलाङ्गुष्ठकोऽकरत्। 'अहं तेभ्योऽकरं नमः' (वा. सं. १६.८)। लङ – 'अग्निमद्य होतारमवृणीतायं यजमानः' (शां. श्रौ. ५.२०.५)। लिट् – 'अद्या ममार' (ऋ. १०.५५.५)। अद्य म्रियते॥

---

1. छन्द आदिकं अ. 2. निरुक्तमधीष्व नास्ति फ. 3. पुनः इत्यधिकम् क. 4. छन्द आदिकं फ. 5. धातुः नास्ति ब. 6. लौकिकव्यवहारे ह. 7. व्यवहारे फ. 8. वर्तते इत्यधिकम् फ. 9. धातुसम्बन्धे नास्ति फ. 10. एव इत्यधिकम् फ. ह. 11. लुङ्–अद्य म्रियते नास्ति ग.